श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ दशाधिकशततमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ दशाधिकशततमः सर्गः ॥

## रावणस्य स्त्रीणां विलापः

रावणं निहतं श्रुत्वा राघवेण महात्मना।
अन्तःपुराद् विनिष्पेतू राक्षस्यः शोककर्शिताः ॥ **6.110.1** ॥

वार्यमाणाः सुबहुशो वेष्टन्त्यः क्षितिपांसुषु।
विमुक्तकेश्यः शोकार्ता गावो वत्सहता इव ॥ **6.110.2** ॥

उत्तरेण विनिष्क्रम्य द्वारेण सह राक्षसैः।
प्रविश्यायोधनं घोरं विचिन्वन्त्यो हतं पतिम् ॥ **6.110.3** ॥

आर्यपुत्रेति वादिन्यो हा नाथेति च सर्वशः।
परिपेतुः कबन्धाङ्कां महीं शोणितकर्दमाम् ॥ **6.110.4** ॥

ता बाष्पपरिपूर्णाक्ष्यो भर्तृशोकपराजिताः।
करिण्य इव नर्दन्त्यः करेण्वो हतयूथपाः ॥ **6.110.5** ॥

ददृशुस्ता महाकायं महावीर्यं महाद्युतिम्।
रावणं निहतं भूमौ नीलाञ्जनचयोपमम् ॥ **6.110.6** ॥

ताः पतिं सहसा दृष्ट्वा शयानं रणपांसुषु।
निपेतुस्तस्य गात्रेषु च्छिन्ना वनलता इव ॥ **6.110.7** ॥

बहुमानात् परिष्वज्य काचिदेनं रुरोद ह।
चरणौ काचिदालम्ब्य काचित् कण्ठेऽवलम्ब्य च॥ **6.110.8** ॥

उत्क्षिप्य च भुजौ काचिद् भूमौ सुपरिवर्तते।
हतस्य वदनं दृष्ट्वा काचिन्मोहमुपागमत्॥ **6.110.9** ॥

काचिदङ्के शिरः कृत्वा रुरोद मुखमीक्षती।
स्नापयन्ती मुखं बाष्पैस्तुषारैरिव पङ्कजम्॥ **6.110.10** ॥

एवमार्ताः पतिं दृष्ट्वा रावणं निहतं भुवि।
चुक्रुशुर्बहुधा शोकाद् भूयस्ताः पर्यदेवयन्॥ **6.110.11** ॥

येन वित्रासितः शक्रो येन वित्रासितो यमः।
येन वैश्रवणो राजा पुष्पकेण वियोजितः॥ **6.110.12** ॥

गन्धर्वाणामृषीणां च सुराणां च महात्मनाम्।
भयं येन रणे दत्तं सोऽयं शेते रणे हतः॥ **6.110.13** ॥

असुरेभ्यः सुरेभ्यो वा पन्नगेभ्योऽपि वा तथा।
भयं यो न विजानाति तस्येदं मानुषाद् भयम्॥ **6.110.14** ॥

अवध्यो देवतानां यस्तथा दानवरक्षसाम्।
हतः सोऽयं रणे शेते मानुषेण पदातिना॥ **6.110.15** ॥

यो न शक्यः सुरैर्हन्तुं न यक्षैर्नासुरैस्तथा।
सोऽयं कश्चिदिवासत्त्वो मृत्युं मर्त्येन लम्भितः॥ **6.110.16** ॥

एवं वदन्त्यो रुरुदुस्तस्य ता दुःखिताः स्त्रियः।
भूय एव च दुःखार्ता विलेपुश्च पुनः पुनः॥ **6.110.17** ॥

अशृण्वता तु सुहृदां सततं हितवादिनाम्।
मरणायाहृता सीता राक्षसाश्च निपातिताः।
एताः सममिदानीं ते वयमात्मा च पातितः॥ **6.110.18** ॥

ब्रुवाणोऽपि हितं वाक्यमिष्टो भ्राता विभीषणः।
दृष्टं परुषितो मोहात् त्वयाऽऽत्मवधकाङ्क्षिणा॥ **6.110.19** ॥

यदि निर्यातिता ते स्यात् सीता रामाय मैथिली।
न नः स्याद् व्यसनं घोरमिदं मूलहरं महत्॥ **6.110.20** ॥

वृत्तकामो भवेद् भ्राता रामो मित्रकुलं भवेत्।
वयं चाविधवाः सर्वाः सकामा न च शत्रवः॥ **6.110.21** ॥

त्वया पुनर्नृशंसेन सीतां संरुन्धता बलात्।
राक्षसा वयमात्मा च त्रयं तुल्यं निपातितम्॥ **6.110.22** ॥

न कामकारः कामं वा तव राक्षसपुङ्गव।
दैवं चेष्टयते सर्वं हतं दैवेन हन्यते॥ **6.110.23** ॥

वानराणां विनाशोऽयं राक्षसानां च ते रणे।
तव चैव महाबाहो दैवयोगादुपागतः॥ **6.110.24** ॥

नैवार्थेन च कामेन विक्रमेण न चाज्ञया।
शक्या दैवगतिर्लोके निवर्तयितुमुद्यता॥ **6.110.25** ॥

विलेपुरेवं दीनास्ता राक्षसाधिपयोषितः।
कुरर्य इव दुःखार्ता बाष्पपर्याकुलेक्षणाः॥ **6.110.26** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे दशाधिकशततमः सर्गः॥